योगवासिष्ठः/प्रकरणम् १ (वैराग्यप्रकरणम्)/सर्गः १५

पञ्चदशः सर्गः १५

श्रीराम उवाच ।

मुधैवाभ्युत्थितो मोहान्मुधैव परिवर्धते ।

मिथ्यामयेन भीतोऽस्मि दुरहंकारशत्रुणा ।। १

अहंकारवशादेव दोषकोशकदर्थताम् ।

ददाति दीनदीनानां संसारो विविधाकृतिः ।। २

अहंकारवशादापदहंकाराद्दुराधयः ।

अहंकारवशादीहा त्वहंकारो ममामयः ।। ३

तमहंकारमाश्रित्य परमं चिरवैरिणम् ।

न भुञ्जे न पिबाम्यम्भः किमु भोगान्भुजे मुने ।। ४

संसाररजनी दीर्घा माया मनसि मोहिनी ।

ततोऽहंकारदोषेण किरातेनेव वागुरा ।। ५

यानि दुःखानि दीर्घाणि विषमाणि महान्ति च ।

अहंकारात्प्रसूतानि तान्यगात्खदिरा इव ।। ६

शमेन्दुसैंहिकेयास्यं गुणपद्महिमाशनिम् ।

साम्यमेघशरत्कालमहंकारं त्यजाम्यहम् ।। ७

नाहं रामो न मे वाञ्छा भावेषु न च मे मनः ।

शान्त आसितुमिच्छामि स्वात्मनीव जिनो यथा ।। ८

अहंकारवशाद्यद्यन्मया भुक्तं हुतं कृतम् ।

सर्वं तत्तदवस्त्वेव वस्त्वहंकाररिक्तता ।। ९

अहमित्यस्ति चेद्ब्रह्मन्नहमापदि दुःखितः ।

नास्ति चेत्सुखितस्तस्मादनहंकारिता वरम् ।। १०

अहंकारं परित्यज्य मुने शान्तमनस्तया ।

अवतिष्ठे गतोद्वेगो भोगौघो भङ्गुरास्पदः ।। ११

ब्रह्मन्यावदहंकारवारिदः परिजृम्भते ।

तावद्विकासमायाति तृष्णाकुटजमञ्जरी ।। १२

अहंकारघने शान्ते तृष्णा नवतडिल्लता ।

शान्तदीपशिखावृत्त्या क्वापि यात्यतिसत्वरम्।। १३

अहंकारमहाविन्ध्ये मनोमत्तमहागजः ।

विस्फूर्जति घनास्फोटैः स्तनितैरिव वारिदः ।। १४

इह देहमहारण्ये घनाहंकारकेसरी ।

योऽयमुल्लसति स्फारस्तेनेदं जगदाततम् ।। १५

तृष्णातन्तुलवप्रोता बहुजन्मपरम्परा ।

अहंकारोग्रखिङ्गेन कण्ठे मुक्तावली कृता ।। १६

पुत्रमित्रकलत्रादितन्त्रमन्त्रविवर्जितम् ।

प्रसारितमनेनेह मुनेऽहंकारवैरिणा ।। १७

प्रमार्जितेऽहमित्यस्मिन्पदे स्वयमपि द्रुतम् ।

प्रमार्जिता भवन्त्येते सर्व एव दुराधयः ।। १८

अहमित्यम्बुदे शान्ते शनैश्च शमशातिनी ।

मनोगगनसंमोहमिहिका क्वापि गच्छति ।। १९

निरहंकारवृत्तेर्मे मौर्ख्याच्छोकेन सीदतः ।

यत्किंचिदुचितं ब्रह्मंस्तदाख्यातुमिहार्हसि ।। २०

सर्वापदां निलयमध्रुवमन्तरस्थ-

मुन्मुक्तमुत्तमगुणेन न संश्रयामि ।

यत्नादहंकृतिपदं परितोऽतिदुःखं

शेषेण मां समनुशाधि महानुभाव ।। २१

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये वैराग्यप्रकरणे अहंकारजुगुप्सा नाम पञ्चदशः सर्गः ।। १५ ।।